# अथ रात्रिसूक्तम्

रात्री॒ व्य॑ख्यदाय॒ती पु॑रु॒त्रा दे॒व्य१॒॑क्षभिः॑ । विश्वा॒ अधि॒श्रियो॑ऽधित ॥

ओर्व॑प्रा॒ अम॑र्त्या नि॒वतो॑ दे॒व्यु१॒॑द्वतः॑ । ज्योति॑षा बाधते॒ तमः॑ ॥

निरु॒ स्वसा॑रमस्कृतो॒षसं॑ दे॒व्या॑य॒ती । अपेदु॑ हासते॒ तमः॑ ॥

सा नो॑ अ॒द्य यस्या॑ व॒यं नि ते॒ याम॒न्नवि॑क्ष्महि । वृ॒क्षे न व॑स॒तिं वयः॑॥

नि ग्रामा॑सो अविक्षत॒ नि प॒द्वन्तो॒ नि प॒क्षिणः॑ ।

नि श्ये॒नास॑श्चिद॒र्थिनः॑ ॥

या॒वया॑ वृ॒क्यं१॒॑ वृकं॑ य॒वय॑ स्ते॒नमू॑र्म्ये । अथा॑ नः सु॒तरा॑ भव ॥

उप॑ मा॒ पेपि॑शत् तमः॑ कृ॒ष्णं व्य॑क्तमस्थित । उष॑ ऋ॒णेव॑ यातय ॥

उप॑ ते॒ गा इ॒वाक॑रं वृणी॒ष्व दु॑हितर्दिवः । रात्रि॒ स्तोमं॒ न जि॒ग्युषे॑ ॥१॥

आ रात्रि॒ पार्थि॑वं॒ रजः॑ पि॒तर॑ः प्रायु॒ धाम॑भिः ।

दि॒वः सदां॑सि बृह॒ती वि ति॑ष्ठस॒ आ त्वे॒षं व॑र्तते॒ तमः॑ ॥

ये ते॑ रात्री नृ॒चक्ष॑सो यु॒क्तासो॑ नव॒तिर्नव॑ ।

अ॒शी॒तिः स॒न्त्व॒ष्टा उ॒तो ते॑ स॒प्त स॒प्तती॑ः ॥

रात्रीं॒ प्रप॑द्ये जन॒नीं सर्व॑भूतनि॒वेश॑नीं ।

भ॒द्रां भ॒गव॑तीं कृ॒ष्णां वि॒श्वस्य॒ जग॒तो निशा॑म् ॥

सं॒वे॒श॒नीं संय॑म॒नीं ग्रह॑नक्ष॒त्रमालि॑नीम् ।

प्रप॑न्नो॒ऽहं शि॒वां रा॒त्रीं भ॒द्रे पा॑रमशी॒महि॑ ॥

भ॒द्रे पा॑रमशी॒मह्यों॑ नमः॑ ॥

स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियाम् ।
सहस्रसंमितां दुर्गां जातवेदसे सुनवाम सोमम् ॥१॥

शान्त्यर्थं तद् द्विजातीनामृषिभिः सोमपाश्रिताः ।
ऋग्वेदे त्वं समुत्पन्नाऽरातीयतो नि दहाति वेदः ॥

ये त्वां देवि प्र पद्यन्ति ब्राह्मणा हव्यवाहनीम् ।
अविद्या बहुविद्या वा स नः पर्षदति दुर्गाणि विश्वा ॥

ये अग्निवर्णां शुभां सौम्यां कीर्तयिष्यन्ति ये द्विजाः ।
ताँस्तारयति दुर्गाणि नावेव सिन्धुं दुरितात्यग्निः ॥२॥

दुर्गेषु विषमे घोरे सङ्ग्रामे रिपुसङ्कटे ।
अग्निचोरनिपातेषु सर्वग्रहनिवारिणि ॥ सर्वग्रहनिवारिण्योंनमः ॥

दुर्गेषु विषमेषु त्वं सङ्ग्रामेषु वनेषु च ।
मोहयित्वा प्र पद्यन्ते तेषां मे अभयं कुरु । तेषां मे अभयं कुर्वों नमः।

केशिनीं सर्वभूतानां पञ्चमीति च नाम च ।
सा मां समा निशा देवी सर्वतः परि रक्षतु ॥ सर्वतः परि रक्षत्वों नमः।

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टां ।
दुर्गां देवीं शरणमहं प्र पद्ये सुतरसि तरसे नमः सुतरसि तरसे नमः ॥

दुर्गा दुर्गेषु स्थानेषु शं नो देवीरभिष्टये ।
य इमं दुर्गास्तवं पुण्यं रात्रौरात्रौ सदा पठेत् ॥

रात्रीसूक्तं जपेन्नित्यं तत्कालमुपपद्यते ।

न योनिं पुनरायाति सर्वपापैः प्रमुच्यते ॥

उलूकयातुं शुशुलोकयातुं जहि श्वयातुमुत कोकयातुम् ।

सुपर्णयातुमुत गृध्रयातुं दृषदेव प्रमृण रक्ष इन्द्र ॥

पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण । सर्वं रक्षो निबर्हय ॥

हिमस्यत्वा जरायुणा शाले परिव्ययामसि ।

उतहृदो हि नो धियोऽग्निर्ददातु भेषजम् ॥

अन्तिकामग्निर्मजनयदूर्वातः शिशुलागमत् ॥

अजातपुत्रपक्षाया हृदयं मम दूयते ।

विपुलं वनं बह्वाकाशं चर जातवेदः कामाय ॥

मां च रक्ष पुत्राँश्च शरणमभूत्तव ।

पिङ्गाक्ष लोहितग्रीव कृष्णवर्ण नमोऽस्तुते ॥

अस्मान्निबर्हणस्येनां सागरस्योर्मयो यथा ।

इन्द्रः क्षत्रं ददातु वरुणमभिषिंश्चतु ॥

शत्रवो निधनं यान्तु जय त्वं ब्रह्मतेजसा ॥

कपिल जटीं सर्वभक्ष्यं चाग्निं प्रत्यक्षदैवतम् ॥

वरुणं च वशाम्यग्रे मम पुत्राँश्च रक्षतु मम पुत्राँश्च रक्षत्वोन्नमः ॥

साग्रं वर्षशतं जीव पिब खाद च मोद च ॥

दुःखिताँश्च द्विजांश्चैव प्रजां च पशु पालय ॥

यावदादित्यस्तपति यावद्भ्राजति चन्द्रमाः ।

यावद्वायुः प्रवायति तावज्जीव जया जय ॥

येन केन प्रकारेण कोहिना मनुजीवति ।

परेषामुपकारार्थं यज्जीवति स जीवति ।

एतां वैश्वानरीं सर्वदेवान्नमोऽस्तुते ॥

न चौरभयं न च सर्पभयं न च व्याघ्रभयं न च मृत्युभयम् ।

यस्यापमृत्युर्न च मृत्युः सर्वं लभते सर्वं जयते ॥

॥ इति रात्रिसूक्तम् ॥